# Yamaproktam Mahadevarchanamahimavarnanam

# યમપ્રોક્તં મહાદેવાર્ચનમહિમવર્ણનમ્

## Document Information

Text title : Yamaproktam Mahadevarchanamahimavarnanam

File name : mahAdevArchanamahimavarNanamyamaproktaM.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 17 | 175-201||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# યમપ્રોક્તં મહાદેવાર્ચનમહિમવર્ણનમ્

શ્રીયમ ઉવાચ -
મહાદેવાર્ચને પ્રીતિર્યસ્ય તિષ્ઠત્યચઞ્ચલા ।
તસ્યાપિ મુક્તિઃ ભાલાક્ષપૂજકસ્ય તુ કિં પુનઃ ॥ ૧૭૫॥

પ્રાપ્યતે સર્વથા મુક્તિઃ શિવપૂજકપૂજકૈઃ ।
મુક્તિર્ન લભ્યતે કિ તૈઃ સાક્ષાચ્છઙ્કરપૂજકૈઃ ॥ ૧૭૬॥

શિવલિઙ્ગાર્ચનં કૃત્વા શિવલિઙ્ગસ્ય સન્નિધૌ ।
યેન ત્યક્તા તનુસ્તેન મુક્તિઃ પ્રાપ્યૈવ સર્વથા ॥ ૧૭૭॥

ભસ્મધારણમાત્રેણ મુક્તિઃ સમ્પ્રાપ્યતે નરૈઃ ।
તતઃ કથં ન સમ્પ્રાપ્યા મુક્તિઃ શઙ્કરપૂજયા ॥ ૧૭૮॥

શિવપૂજનરુદ્રાક્ષભસ્મધારણતત્પરઃ ।
કીકટોઽપિ તનું ત્યક્ત્વા શિવરૂપં પ્રયાન્તિ હિ ॥ ૧૭૯॥

શિવપૂજનમાહાત્મ્યં શિવો વેત્ત્યેવ નાપરઃ ।
તદન્યૈસ્તત્કથં જ્ઞેયં તત્ત્વતોઽસ્માભિરીદૃશૈઃ ॥ ૧૮૦॥

રત્નતત્ત્વં વિજાન્તિ સમ્યગ્રત્નપરીક્ષકાઃ ।
તથા શિવાર્ચનસ્યાપિ માહાત્મ્યં વેત્તિ શઙ્કરઃ ॥ ૧૮૧॥

અતઃ પરં હિ તં વક્ષ્યે શ ृણ્વન્ત્વત્યન્તયત્નતઃ ।
કર્તવ્યમપિ ચક્ષ્યેઽહમપ્રમાદેન સાદરમ્ ॥ ૧૮૨॥

ત્રિપુણ્ડ્રમાત્રં યદ્ભાલે ભાસતે ભસ્મના કૃતમ્ ।
તાન્દૃષ્ટ્વા પ્રિયમેધા સ પ્રાર્ચતાર્ઘ્યાદિસાધનૈઃ ॥ ૧૮૩ ॥

ત્રિપુણ્ડ્રરુદ્રાક્ષધરઃ શિવપૂજાપરાયણઃ ।
શિવ એવેતિ વિજ્ઞાયો ભવદ્ભિઃ સર્વથા ભટાઃ ॥ ૧૮૪॥

ભાસતે ભાલમનિશં યસ્ય કેવલભસ્મના ।

તત્તુ ભાલાક્ષભાલેઽપિ લિખ્યતે નૈવ સંશયઃ ॥ ૧૮૫॥

ભસ્મરેખાત્રયં શુદ્ધં તદ્ભાલાક્ષાક્ષરત્રયમ્ ।
ભાલપટ્ટે ભસ્મરેખાસ્વરૂપૈસ્ત્રિભિરક્ષરૈઃ ॥ ૧૮૬॥

ભાલાક્ષતા ભાવિનીતિ ભાલાક્ષાક્ષરલેખનમ્ ।
અતઃ કેવલભસ્માઙ્ગાઃ શિવપૂજાપરાયણાઃ ॥ ૧૮૭॥

શિવાકારા ઇતિ જ્ઞેયાઃ સત્યં સત્યં ન સંશયઃ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગાન્દૃષ્ટ્વા સોત્સાહમન્વહમ્ ॥ ૧૮૮॥

પૂજયન્ત્યતિયત્નેન ભ્રમાલસ્યવિવર્જિતાઃ ।
રુદ્રાક્ષમાલાભરણાન્ભસ્મધારણપૂર્વકમ્ ॥ ૧૮૯॥

પૂજયન્ત્યતિયત્નેન ભ્રમાલસ્યવિવર્જિતાઃ ।
શિવલિઙ્ગાર્ચનાસક્તાન્ ભસ્મધારણપૂર્વકમ્ ॥ ૧૯૦॥

પૂજયન્ત્યતિયત્નેન ભ્રમાલસ્યવિવર્જિતાઃ ।
શિવપ્રદક્ષિણાસક્તાન્ ભસ્મધારણપૂર્વકમ્ ॥ ૧૯૧॥

પૂજયન્ત્યતિયત્નેન ભ્રમાલસ્યવિવર્જિતાઃ ।
ધૂપદાન્ શઙ્કરસ્થાને ભસ્મધારણપૂર્વકમ્ ॥ ૧૯૨॥

પૂજયન્ત્યતિયત્નેન ભ્રમાલસ્યવિવર્જિતાઃ ।
દીપદાન્ શઙ્કરસ્થાને ભસ્મધારણપૂર્વકમ્ ॥ ૧૯૩॥

પૂજયન્ત્યતિયત્નેન ભ્રમાલસ્યવિવર્જિતાઃ ।
શિવાગ્રે નર્તનાસક્તાન્ભસ્મધારણપૂર્વકમ્ ॥ ૧૯૭॥

પૂજયન્ત્યતિયત્નેન ભ્રમાલસ્યવિવર્જિતાઃ ।
સોમવારવ્રતપરાન્ ભસ્મધારણપૂર્વકમ્ ॥ ૧૯૫॥

પૂજયન્ત્યતિયત્નેન ભ્રમાલસ્યવિવર્જિતાઃ ।
પ્રદોષપૂજનાસક્તાન્ભસ્મધારણપૂર્વકમ્ ॥ ૧૯૬॥

પૂજયન્ત્યતિયત્નેન ભ્રમાલસ્યવિવર્જિતાઃ ।
રુદ્રાભિષેકસંસક્તાન્ભસ્મધારણપૂર્વકમ્ ॥ ૧૯૭॥

પૂજયન્ત્યતિયત્નેન ભ્રમાલસ્યવિવર્જિતાઃ ।
શિવભક્તાર્ચનપરાન્ભસ્મોદ્ધૂલનપૂર્વકમ્ ॥ ૧૯૮॥

પૂજયન્ત્યતિયત્નેન ભ્રમાલસ્યવિવર્જિતાઃ ।
બિલ્વપત્રાર્ચનપરાન્ ભસ્મોદ્ધૂલનપૂર્વકમ્ ॥ ૧૯૯॥

પૂજયન્ત્યતિયત્નેન ભ્રમાલસ્યવિવર્જિતાઃ ।
બિલ્વરોપણસંસક્તાન્ ભસ્મોદ્ધૂલનપૂર્વકમ્ ॥ ૨૦૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે યમપ્રોક્તં મહાદેવાર્ચનમહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૭ । ૧૭૫-૨૦૧॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 17 . 175-201 ..

Notes:
Yama યમ outlines the merits of worshiping Mahādeva Śiva મહાદેવ શિવ by several ways; and highlights the importance of application of Bhasma ભસ્મ in the process.

Encoded and proofread by Ruma Dewan

---

*Yamaproktam Mahadevarchanamahimavarnanam*
pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*